श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री मुरारिपञ्चरत्नस्तोत्रम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री मुरारिपञ्चरत्नस्तोत्रम् ॥

यत्सेवनेन पितृमातृसहोदराणां
चित्तं न मोहमहिमा मलिनं करोति।
इत्थं समीक्ष्य तव भक्तजनान् मुरारे
मूकोऽस्मि तेऽङ्घ्रिकमलं तदतीव धन्यम् ॥ 1 ॥

ये ये विलग्नमनसः सुखमाप्तुकामाः
ते ते भवन्ति जगदुद्भवमोहशून्याः।
दृष्ट्वा विनष्टधनधान्यगृहान् मुरारे
मूकोऽस्मि तेऽङ्घ्रिकमलं तदतीव धन्यम् ॥ 2 ॥

वस्त्राणि दिग्वलयमावसतिः श्मशाने
पात्रं कपालमपि मुण्डविभूषणानि।
रुद्रे प्रसादमचलं तव वीक्ष्य शौरे
मूकोऽस्मि तेऽङ्घ्रिकमलं तदतीव धन्यम् ॥ 3 ॥

यत्कीर्तिगायनपरस्य विधातृसूनोः
कौपीनमैणमजिनं विपुलां विभूतिम्।
स्वस्यार्थदिग्भ्रमणमीक्ष्य तु सार्वकालं
मूकोऽस्मि तेऽङ्घ्रिकमलं तदतीव धन्यम् ॥ 4 ॥

यद्वीक्षणे धृतधियामशनं फलादि
वासोऽपि निर्जिनवने गिरिकन्दरासु।
वासांसि वल्कलमयानि विलोक्य चैवं
मूकोऽस्मि तेऽङ्घ्रिकमलं तदतीव धन्यम् ॥ 5 ॥

स्तोत्रं पादाम्बुजस्यैतच्छ्रीशस्य विजितेन्द्रियः।
पठित्वा तत्पदं याति श्लोकार्थज्ञस्तु यो नरः॥ 6 ॥

॥ इति श्री मुरारिपञ्चरत्नस्तोत्रं समाप्तम्॥